श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

बलिराजेन्द्रेणोक्तं

# ॥ श्री हरिनाममालास्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री हरिनाममालास्तोत्रम् ॥

गोविन्दं गोकुलानन्दं गोपालं गोपिवल्लभम्।
गोवर्धनोद्धरं धीरं तं वन्दे गोमतीप्रियम्॥ 1 ॥

नारायणं निराकारं नरवीरं नरोत्तमम्।
नृसिंहं नागनाथं च तं वन्दे नरकान्तकम्॥ 2 ॥

पीताम्बरं पद्मनाभं पद्माक्षं पुरुषोत्तमम्।
पवित्रं परमानन्दं तं वन्दे परमेश्वरम्॥ 3 ॥

राघवं रामचन्द्रं च रावणारिं रमापतिम्।
राजीवलोचनं रामं तं वन्दे रघुनन्दनम्॥ 4 ॥

वामनं विश्वरूपं च वासुदेवं च विठ्ठलम्।
विश्वेश्वरं विभुं व्यासं तं वन्दे वेदवल्लभम्॥ 5 ॥

दामोदरं दिव्यसिंहं दयालुं दीननायकम्।
दैत्यारिं देवदेवेशं तं वन्दे देवकीसुतम्॥ 6 ॥

मुरारिं माधवं मत्स्यं मुकुन्दं मुष्टिमर्दनम्।
मुञ्जकेशं महाबाहुं तं वन्दे मधुसूदनम्॥ 7 ॥

केशवं कमलाकान्तं कामेशं कौस्तुभप्रियम्।
कौमोदकीधरं कृष्णं तं वन्दे कौरवान्तकम्॥ 8 ॥

भूधरं भुवनानन्दं भूतेशं भूतनायकम्।
भावनैकं भुजङ्गेशं तं वन्दे भवनाशनम्॥ 9 ॥

जनार्दनं जगन्नाथं जगज्जाड्यविनाशकम्।
जामदग्न्यं वरं ज्योतिस्तं वन्दे जलशायिनम्॥ **10** ॥

चतुर्भुजं चिदानन्दं चाणूरमल्लमर्दनम्।
चराचरगतं देवं तं वन्दे चक्रपाणिनम्॥ **11** ॥

श्रियःकरं श्रियोनाथं श्रीधरं श्रीवरप्रदम्।
श्रीवत्सलधरं सौम्यं तं वन्दे श्रीसुरेश्वरम्॥ **12** ॥

योगीश्वरं यज्ञपतिं यशोदानन्ददायकम्।
यमुनाजलकल्लोलं तं वन्दे यदुनायकम्॥ **13** ॥

शालग्रामशिलाशुद्धं शङ्खचक्रोपशोभितम्।
सुरासुरैस्सदा सेव्यं तं वन्दे साधुवल्लभम्॥ **14** ॥

त्रिविक्रमं तपोमूर्तिं त्रिविधाघौघनाशनम्।
त्रिस्थलं तीर्थराजेन्द्रं तं वन्दे तुलसीप्रियम्॥ **15** ॥

अनन्तमादिपुरुषमच्युतं च वरप्रदम्।
आनन्दं च सदानन्दं तं वन्दे चाघनाशनम्॥ **16** ॥

लीलया धृतभूभारं लोकसत्त्वैकवन्दितम्।
लोकेश्वरं च श्रीकान्तं तं वन्दे लक्ष्मणप्रियम्॥ **17** ॥

हरिं च हरिणाक्षं च हरिनाथं हरिप्रियम्।
हलायुधसहायं च तं वन्दे हनुमत्पतिम्॥ **18** ॥

हरिनामकृतामाला पवित्रा पापनाशिनी।
बलिराजेन्द्रेण चोक्ता कण्ठे धार्या प्रयत्नतः॥ **19** ॥

॥ श्री हरिनाममालास्तोत्रं समाप्तम्॥